শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিৱ্যমণিপাদুকাভ্যাং নমঃ

শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্ৱতন্ত্রস্য
শ্রীমদ্ৱেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে

# ॥ সমাখ্যাপদ্ধতিঃ দ্ৱিতীযা ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিৱ্যমণিপাদুকাভ্যাং নমঃ

# ॥ সমাখ্যাপদ্ধতিঃ দ্ৱিতীযা ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

ৱন্দে ৱিষ্ণুপদাসক্তং তমৃষিং তাঞ্চ পাদুকাম্।
যথার্থা শঠজিৎসংজ্ঞা মচ্চিত্তৱিজযাদ্যযোঃ ॥ **2.1** ॥

দ্রমিডোপনিষন্নিৱেশশূন্যান্
অপি লক্ষ্মীরমণায রোচযিষ্যন্।
ধ্রুৱমাৱিশতি স্ম পাদুকাত্মা
শঠকোপঃ স্ৱযমেৱ মাননীযঃ ॥ **2.2** ॥

নিযতং মণিপাদুকে ! দধানঃ
স মুনিস্তে শঠকোপ ইত্যভিখ্যাম্।
ৎৱদুপাশ্রিতপাদজাতৱংশ -
প্রতিপত্ত্যৈ পরমাততান রূপম্ ॥ **2.3** ॥

মুনিনা মণিপাদুকে ! ৎৱযা চ
প্রথিতাভ্যাং শঠকোপসংজ্ঞযৈৱ।
দ্ৱিতযং সকলোপজীৱ্যমাসীৎ
প্রথমেন শ্রুতিরন্যতস্তদর্থঃ ॥ **2.4** ॥

আকর্ণ্য কর্ণামৃতমাত্মৱন্তো গাথাসহস্রং শঠকোপসূরেঃ।
মঞ্জুপ্রণাদাং মণিপাদুকে ! ৎৱাম্ তদেকনামানমনুস্মরন্তি ॥ **2.5** ॥

যঃ সপ্তপর্ৱৱ্যৱধানতুঙ্গাং
    শেষৎৱকাষ্ঠামভজন্মুরারেঃ।
তস্যাপি নামোদ্বহনাৎ ৎৱযাঽসৌ
    লঘূকৃতোঽভূচ্ছঠকোপসূরিঃ॥ **2.6** ॥

শয্যাত্মনা মধুরিপোরসি শেষভূতা
    পাদাশ্রযেণ চ পুনর্দ্ৱিগুণীকৃতং তৎ।
ভূযোঽপি ভাগৱতশেষতযা তদেৱ
    ৱ্যক্তুং পদাৱনি ! শঠারিপদং বিভর্ষি॥ **2.7** ॥

পদ্যেন দেৱি ! শঠকোপমুনিস্তৱাসীৎ
    তস্যাপি নামৱহনান্মণিপাদুকে ! ৎৱম্।
শেষী বভূৱ যুৱযোরপি শেষশাযী
    শেষং ৎৱশেষমপি শেষপদে স্থিতং ৱঃ॥ **2.8** ॥

ৱিন্ধ্যস্তম্ভাদৱিহতগতের্ৱিষ্ণুৱগাচান্তসিন্ধোঃ
    কুম্ভীসূনোরসুরকবলগ্রাসিনঃ স্ৱৈরভাষা।
নিত্যং জাতা শঠরিপুতনোর্নিষ্পতন্তী মুখাৎ তে
    প্রাচীনানাং শ্রুতিপরিষদাং পাদুকে ! পূর্ৱগণ্যা॥ **2.9** ॥

শঠকোপ ইতি সমাখ্যা তৱ রঙ্গধুরীণপাদুকে ! যুক্তা।
সূতে সহস্রমেৱং সূক্তীঃ স্ৱযমেৱ যন্মযা ভৱতী॥ **2.10** ॥

॥ ইতি শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্ৱতন্ত্রস্য
শ্রীমদ্বেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে সমাখ্যাপদ্ধতিঃ দ্বিতীযা॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥